শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীব্রহ্মদেৱ কৃতা

# ॥শ্রীৱামনস্তুতিঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TeX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীৰামনস্তুতিঃ ॥

জযাধীশ জযাজেয জয ৰিশ্বগুরো হরে।
জন্মমৃত্যুজরাতীত জযানন্ত জযাচ্যুত॥ ১ ॥

জযাজিত জযাশেষ জযাৰ্যক্তস্থিতে জয।
পরমার্থার্থ সৰ্বজ্ঞ জ্ঞানজ্ঞেযার্থনিঃসৃত॥ ২ ॥

জযাশেষ জগতসাক্ষিঞ্জগতকর্ত্তুর্জগদগুরো।
জগতোজগদন্তেশ স্থিতৌ পালযতে জয॥ ৩ ॥

জযাখিল জযাশেষ জয সৰ্বহৃদিস্থিত।
জযাদিমধ্যান্তময সৰ্বজ্ঞানমযোত্তম॥ ৪ ॥

মুমুক্ষুভিরনির্দেশ্য নিত্যহৃষ্ট জযেশ্বর।
যোগিভির্মুক্তিকামৈস্তু দমাদিগুণভূষণ॥ ৫ ॥

জযাতিসূক্ষ্ম দুর্জ্ঞেয জয স্থূল জগন্ময।
জয সূক্ষ্মাতিসূক্ষ্ম ত্বং জযানিন্দ্রিয সেন্দ্রিয॥ ৬ ॥

জয স্বমাযাযোগস্থ শেষভোগ জযাক্ষর।
জযৈকদংষ্ট্রপ্রান্তেন সমুদধৃতৰসুন্ধর॥ ৭ ॥

নৃকেসরিন্ সুরারাতিৰক্ষঃস্থলৰিদারণ।
সাম্প্রতং জয ৰিশ্বাত্মন্ মাযাৰামন কেশৰ॥ ৮ ॥

নিজমাযাপরিচ্ছিন্ন জগদধাতর্জনার্দন।
জযাচিন্ত্য জযানেকস্বৰূপৈকৰিধ প্রভো॥ ৯ ॥

ৰর্দ্ধস্ব ৰর্ধিতানেকৰিকারপ্রকৃতে হরে।
ত্বয্যেষা জগতামীশে সংস্থিতা ধর্মপদ্ধতিঃ॥ ১০ ॥

ন ত্বামহং ন চেশানো নেন্দ্রাদ্যাস্ত্রিদশা হরে।
জ্ঞাতুমীশা ন মুনযঃ সনকাদ্যা নে যোগিনঃ॥ ১১ ॥

www.prapatti.com

ত্বং মাযাপটসংৱীতো জগত্যত্ৰ জগতপতে।
কস্তৱাং ৱেতস্যতি সৰ্ৱেশ ত্বতপ্ৰসাদং ৱিনা নরঃ॥ ১২ ॥

ত্বমেৱারাধিতো যস্য প্ৰসাদসুমুখঃ প্ৰভো।
স এৱ কেৱলং দেৱং ৱেত্তি নেতরো জনঃ॥ ১৩ ॥

তদীশ্বরেশ্বরেশান ৱিভো ৱৰ্দ্ধস্ব ভাৱন।
প্ৰভৱাযাস্য ৱিশ্বস্য ৱিশ্বাত্মন্ পৃথুলোচন॥ ১৪ ॥

॥ ইতি শ্ৰীৱামনস্তুতিঃ সংপূৰ্ণা ॥

www.prapatti.com